# सायंकाले सागरतीरम्

सान्ध्यमम्बरं अरुणभासुरम्
सान्द्रसुन्दरं नयनमोहनम् ।
सायंकाले सागरतीरं
सानन्दं बहुरमणीयम् ॥

चक्रवालसीमातु चारुतम्
चमत्कारदायकं अर्कबिम्बम् ।
चन्दनशीकरमन्दानिलश्च
चञ्चलं वाति मन्दं मन्दम् ॥

उल्लासपूर्णं समुद्रवेला
उद्गच्छन्ताः सागरवीचयः ।
उन्मीलननेत्रा तारागणाः
उन्मादभावेन परिलसन्ति ॥

जलनिधिं वीक्ष्य सुस्मितम्
जनानां वार्तालापं सर्वत्र ।
ज्योत्स्नया पूरितमाकाशं
ज्योतिर्मयं पार्वणशशिबिम्बम् ॥

आकाशं बहुवर्णविचित्रं
आलेखितं नीलं पीतं श्वेतम् ।
आबालवृद्ध जनमानसानां
आनन्दितमियं इन्द्रधनुशतम् ॥

निबिडं पूर्णं घनान्धकारम्
निर्जनं निर्घोषं शैत्यपूर्णम् ।
निर्गच्छन्ति जनाः सर्वे झटित्येव
निजगेहं प्रापणात्सुखतया ॥